https://universitynews.in/

# M.A. (Final) EXAMINATION, 2018

## SANSKRIT

## वर्ग ( अ ) Third (B) Paper (i) कालिदासः

**Time allowed: Three hours** **Maximum marks: 100**

परीक्षार्थिभिः समेषां प्रश्नानामुत्तराणि स्वसंस्कृतगिरा लेखनीयानि।

1. निम्नाङ्कितयोः कस्यचिदेकस्य श्लोकस्य सप्रसङ्गव्याख्या करणीया–

कर्णेषु योग्यं नवकर्णिकारं चलेषु नीलेष्वलकेष्वशोकम्।
पुष्पं च फुल्लं नवमल्लिकायाः प्रयान्ति कान्तिं प्रमदाजनानाम्।। 10

अथवा

तारागण प्रवरभूषणमुद्वहन्ती मेघावरोधपरिमुक्तशशाङ्कवक्त्रा।
ज्योत्स्नादुकूलममलं रजनी दधाना वृद्धिं प्रयात्यनुदिनं प्रमदेव बाला।। 10

2. एकस्य श्लोकस्य व्याख्या संस्कृतमाध्यमेन कार्या–

यदृच्छया त्वं सकृदप्यबन्ध्ययोः पथि स्थिता सुंदरि यस्य नेत्रयोः।
त्वया विना सोऽपि समुत्सुको भवेत्सखीजनस्ते किमुदाईसौहृदः।। 10

अथवा

सामन्तमौलिमणिरञ्जितपादपीठं एकातपत्रमवनेर्न तथा प्रभुत्वम्।
अस्याः सखे ! चरणयोरहमद्य कान्तं आज्ञाकरत्वमधिगम्य यथा कृतार्थः।। 10

3. अधोलिखितस्य एकस्य श्लोकस्य ससन्दर्भव्याख्या संस्कृतमाध्यमेन विधेया–

भावज्ञानानन्तरं प्रस्तुतेन प्रत्याख्याने दत्तयुक्तोत्तरेण।
वाक्येनेयं स्थापिता स्वे निदेशे स्थाने प्राणाः कामिनां दूत्यधीनाः।।

अथवा

कदा मुखं वरतनु कारणादृते तवागतं क्षणमपि कोपपात्रताम्।
अपर्वणि ग्रहकलुषेन्दुमण्डला विभावरी कथय कथं भविष्यति।। 10

4. कस्यचिदेकस्य श्लोकस्य व्याख्या करणीया–

त्यागाय संभृतार्थानां सत्याय मितभाषिणाम्।
यशसे विजिगीषूणां प्रजायै गृहमेधिनाम्।। 10

अथवा

स्थाने भवानेकनराधिपः सन्नकिंचनत्वं मखजं व्यनक्ति।
पर्यायपीतस्य सुरैर्हिमांशोः कलाक्षयः श्लाघ्यतरो हि वृद्धेः।। 10

5. कस्यचिदेकस्य श्लोकस्य व्याख्या कार्या–

अथावमानेन पितुः प्रयुक्ता दक्षस्य कन्या भवपूर्वपत्नी।
सती सती योगविसृष्टदेहा तां जन्मने शैलवधूं प्रपेदे।। 10

अथवा

मनीषिताः सन्ति गृहेषु देवतास्तपः क्व वत्से क्व च तावकं वपुः।
पदं सहेत भ्रमरस्य पेलवं शिरीषपुष्पं न पुनः पतत्रिणः।। 10

6. अधोलिखितश्लोकयोः एकस्य ससन्दर्भभावार्थो विलेख्यः–

पक्षच्छिदा गोत्रभिदात्तगन्धाः शरण्यमेनं शतशो महीध्राः।
नृपा इवोपप्लविनः परेभ्यो धर्मोत्तरं मध्यममाश्रयन्ते।। 5

https://universitynews.in/

https://universitynews.in/

अथवा

मनो नवद्वारनिषिद्धवृत्तिं हृदि व्यवस्थाप्य समाधिवश्यम्।
यमक्षरं क्षेत्रविदो विदुस्तमात्मानमात्मन्यवलोकयन्तम्।। 5

7. अधोलिखितेषु टिप्पणीद्वयं लिखत–

(i) कालिदासस्य कालनिर्धारणम्।

(ii) कालिदासस्य काव्येषु राजनीतिकस्थितिः।

(iii) कालिदासस्य नाटकानि।

(iv) कालिदासस्य काव्येषु सङ्गीतकला 7½+7½

8. विक्रमोर्वशीयनाटकस्य रसयोजनां विवेचयत। 20

अथवा

मालविकाग्निमित्रस्य वस्तुयोजनां विवेचयत।। 20

9. ऋतुसंहारस्य प्रकृतिवर्णनं स्वभाषया कुरुत। 10

अथवा

''उपमा कालिदासस्य'' इति निरूपयत। 10

https://universitynews.in

https://universitynews.in/